LVI-14

# ऋग्वेदे वाचः समुत्पत्तिः स्वरूपञ्च

**Dr. Prativa Manjari Rath (Mrs.)**
P.G. Dept. of Sanskrit
Utkal University, Vanivihar
Bhubaneswar - 751009

## १. उपक्रमः

वाचः मूलतत्त्वस्यान्वेषणं वाग्विज्ञानस्य सूक्ष्मानुसूक्ष्मपर्य्यालोचनं वैदिकसाहित्यस्य विश्वसाहित्यं प्रति मौलिकमवदानम् । भाषा मानवस्य चिन्तनमनुभवं प्रकाशयितुं मानवोद्भावितमेकसाधनमस्तीति साधारणतया स्वीक्रियते । अत एतस्मिन् सामान्यविषये गम्भीरचिन्तनस्य का प्रसक्ति ? परं वैदिकसाहित्ये वाचः यत् मौलिकं तत्त्वं प्रादुर्भूतं प्रतिष्ठितञ्च तत् वाग्विज्ञानस्य सूक्ष्मातिसूक्ष्मचिन्तनस्य, वाचः स्वरूपविषये गम्भीरतत्त्वस्य अनन्यां प्रतिष्ठां विमर्शयति । निरूक्तग्रन्थे वाचः सप्तसंख्याधिकपञ्चाशतसंख्यका प्रतिशब्दाः वर्त्तन्ते ।[१] आर्यभारतीयभाषायाः प्राचीनावस्था संस्कृते दृश्यते । प्राचीनतमा च वेदो विशेषतः ऋग्वेदे दृश्यते । संस्कृतस्य इतिहासः, संस्कृतेः उन्मेषः, सभ्यतायाः परिनिष्ठितं रूपञ्च ऋग्वेदेन सह प्रारभ्यते । एतस्मिन् ऋग्वेदे वाचः यत् स्वरूपं ऋषिभिः प्रदर्शितं तदेव प्रबन्धे आलोच्यते ।

## २. मानवेषु वाचः समुत्पत्तिः

भाषायाः व्यवहारः मानवेष्विव दृश्यते । न तु इतरेषु तीर्य्यग्योनिषु प्राणिषु सोऽपि जगदीश्वरस्य करुणयैव सम्भवतीति मानवस्य भाषाधिकारो दिव्यशक्तिप्रभावप्रसूत इत्यत्र न कस्यापि वैमत्यम् । भाषायाः समुत्पत्तिविषये ध्वन्यनुकृतिप्रभृतिमवलम्ब्य यानि तत्त्वानि सन्ति, तेषु नैकमपि तत्त्वं पूर्णतया भाषोत्पत्तिं निर्णेतुमलम् । कालकोकिलादिकतिपयशब्दानां सृष्टिः एवंविधतत्त्वेन साधयितुं क्षमते न तु सर्वेषां शब्दानाम् ऋग्वेदे श्रूयते यत् वाचः सृष्टौ मानवो परमनियामको आसीत् । ब्राह्मणाः वसिष्ठाश्च वाचः स्रष्टारः ज्ञातारः वा आसन्निति ऋग्वेदे वर्ण्यते, वाचः ज्ञातृरूपेण तेषां स्रष्टृत्वमपि प्रतिपाद्यते, तद्यथा

> ब्राह्मणासः सोमिनो वाचमक्रत । (ऋ. वे. ७.१०३.८)
>
> वसिष्ठासः पितृवत् वाचमक्रत ॥ (ऋ. वे. १०.६६.१४)

अग्नेः परिचारकाः अङ्गिरस वाचं प्रथमममन्वतेति ऋग्वेदे श्रूयते- तद्यथा

---

१. निरुक्तम्- द्वितीयाध्यायः- सप्तमपादः ।



Vijnana Bharati

ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विन्दन् ।

तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ॥ (ऋ. वे. ४.१.१६)

अर्थात् अङ्गिरसः अभिपरिचर्य्याबलात् प्रथमं वाचः नाम स्तुतिसाधकानि पदानि अमन्वत, ततः त्रिसंख्यकानि तासां वाच उत्तमानि स्थानानि सप्तछन्दांसि अविन्दन् । तानि च छन्दांसि गायत्र्यादीनि जगत्यन्तानि सप्त, अतिजगत्यादीनि अतिधृत्यन्तानि सप्त तथा कृतिप्रभृती न्युत्कृतिपर्यन्तानि सप्तेति त्रिसप्तसंख्यकानि भवन्ति ।

## ३. यज्ञविधानार्थं वाचः समुत्पत्तिः

तथैव ऋग्वेदस्य अपरमन्त्रानुसारेण यज्ञविधानार्थं हि वाचः सृष्टिरभवत् । अत उच्यते-

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन् ऋषिषु प्रविष्टाम् ।

तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥ (ऋ. वे. १०.७१.३)

अर्थात् विदितार्थाः धीराः वाचः मार्गं यज्ञेन प्राप्तवन्तः । अतीन्द्रियार्थदर्शिषु प्रविष्टां तां वाचमलभन्त । अनन्तरं तां वाचमाहृत्य बहुषु देशेषु सर्वान् मनुष्यान् अध्यापयामासुः । एतादृशीं वाचं शब्दायमानाः पक्षिणः पक्षिस्वरूपाणि गायत्र्यादीनि सप्तछन्दांसि अभितः संगच्छन्ते । तपसा पुनरपि श्रमेणैव वाचः तत्त्वस्य प्रतिस्पुरणं भवति मनीषिसु ऋषिष्विति तैत्तिरीयब्राह्मणे प्रतिपादितम् । तद्यथा-

यामृषयो मन्त्रकृतो मनीषिणः अन्वैच्छन् देवाः तपसा श्रमेण ।

तां देवीं वाचं हविषा यजामहे सा नो दधातु सुकृतस्य लोके ॥ (तै. ब्रा. २.८)

वाचः रहस्यदर्शनं स्वानुभूतिश्च ऋषीणां तपसा जागरणेन एव सम्भवति । अत ऋग्वेदे उक्तम्-

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।

यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥ (ऋ. वे. ५.४४.१४)

अर्थात् यः सर्वदा विनिद्रः जागरूको भूत्वा वर्तते तं शास्त्रात्मिकाः ऋचः कामयन्ते तमेव स्तोत्ररूपाणि सामानि प्राप्नुवन्ति अभिषुताः सोमाः मां स्वीकुर्वीति तमेवाह । अतः सत्यासत्यधर्माधर्मव्यज्ञापयित्र्याः वाचः उपासना उपनिषदि उपदिश्यते । तद्यथा-

यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो



Vijnana Bharati

नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्वेति ॥ (छान्दोग्योपनिषद् ७.२.२)

### ४. वाचः दैवत्वं नित्यत्वञ्च:

संस्कृतं नाम दैवीवागन्वाख्याता महार्षिभिः इति काव्यादर्शे दैवीवाग्रूपेण संस्कृतभाषायाः वैशिष्ट्यं प्रतिपाद्यते । वाचः दिव्यत्वस्य नित्यत्वस्य चोद्गम ऋग्वेदे लभ्यते ।

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ (ऋ.वे. ८.१००.११)

मन्त्रेऽस्मिन् बेदवाणी दैवीवाग्रूपेण स्तुता । तां द्योतमानां वाचं देवा अजनयन्त । ताः विश्वरूपाः व्यक्तवाच अव्यक्तवाचश्च सर्वे पशवो बदन्ति । सा वाग्देवी मन्द्रा मादयित्री सुष्टुता इषमन्नञ्च दुहाना धेनुः वत्सान् प्रति यथा गच्छति तथा अस्मानुपगच्छतु ।

वागाम्भृणीसूक्ते वाणीरेव सर्वाधिष्ठानत्वात् ब्रह्मरूपेणात्मानं प्रस्तौति । ऋग्वेदस्य दशममण्डले वाक्स्वयमेव मूर्त्तरूपेणाम्भृणमहर्षेर्दुहितृब्रह्मविदुषीरूपेणात्मनः वैशिष्ट्यं प्रतिपादयति । वागेव स्वयं परमात्मना तादात्म्यनुभवन्ती सर्वजगत्रूपेण सर्वस्याधिष्ठानत्वेन प्रपञ्चिता । शुक्तौ रजतमिव वाच्येव सर्वमध्यस्तम् । वाचः विश्वरूपेणावस्थानं प्रतिपादयन् ऋषिर्वदति ।

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥ (ऋ.वे. १०.१२५.३)

देवैर्मनुष्यैश्च सेविता वाक् यं रक्षितुं वाञ्छति तमुग्रं स्रष्टारं ब्राह्मणं तथा तमेव ऋषिमतीन्द्रियद्रष्टारं कारयति । वाच अनुग्रहेण मनुष्यः मेधावी शोभनप्रज्ञश्च भवति । शब्दतत्त्वरूपेण वाक् विश्वब्रह्माण्डस्य पोषिका । सर्वाणि भूतज्ञातानि अनुप्रविश्य वागेव विविधं व्याप्य तिष्ठति । इयं वाणी विविधेषु स्थानेषु विविधानि रूपाणि भवन्ति । सूक्ष्मस्तरात् स्थूलस्तरपर्यन्तं वाक् अमितरूपात् परिमितरूपं प्राप्नोति । अमितरूपा वाक् दैवी परिमितरूपा वाक् मानुषी भवति । दैवीवाणी स्वल्पेन शब्देन वहून् अर्थान् प्रतिपादयति । मानुषीवागपरिमितशब्देन परिमितमर्थं प्रकाशयति । दैवीवाणी परमव्योमतः मनुषीवाणी हृदयान्तरिक्षतः निःसृता भवति ।

वाचस्पतिः वाण्या अधिष्टातृदेवः तथा रक्षकः भवति । बृहस्पतिरेव प्रथमं वाचं प्रैरयत् इति वर्णितं वैदिकमन्त्रे । ऋग्वेदस्य दशममण्डले ज्ञानसूक्तस्याद्य मन्त्र इममेवार्थं प्रतिपादयति-

बृह॑स्पते प्रथ॒मं वा॒चो अग्रं॒ यत्प्रैर॑त नाम॒धेयं॒ दधा॑नाः ।

यदे॑षां॒ श्रेष्ठं॒ यद॑रि॒प्रमासी॑त्प्रे॒णा तदे॑षां॒ निहि॑तं॒ गुहा॒विः ॥ (ऋ.वे. १०.७१.१)

इत्थमेव वाचः सृष्टिर्दैवी न मानवीति सर्वथा स्वीकृता । स्वाध्यायकाले वागेव स्वार्थं प्रेम्णा प्रकाशयाति ।

## ५. वाचः स्वरूपं भेदांश्च

शब्दस्य चतुर्विधं भेदं वैयाकरणाः दार्शनिकाश्च कल्पयन्ति । शब्दस्य व्यक्तात्मकं रूपं वैखरी भवति । परा, पश्यन्ती, मध्यमा- इति शब्दस्याव्यक्तरूपाणि भवन्ति । अस्य गम्भीरसिद्धान्तस्य मुलस्रोतः ऋग्वेद एव वर्तते । यथा-

च॒त्वारि॒ वाक् परि॑मिता प॒दानि॒ तानि॑ विदुर्ब्राह्म॒णा ये म॑नी॒षिणः॑ ।

गुहा॒ त्रीणि॒ निहि॑ता॒ नेङ्ग॑यन्ति तु॒रीयं॑ वा॒चो म॑नु॒ष्या॑ वदन्ति ॥ (ऋ.वे. १.१६४.४५)

शब्दस्य वाक्रूपतया प्रकाशनात् प्रागेव मूलाधारनाभिहृदयेषु स्थितत्वाद् शब्दस्तदा सर्वेषां ज्ञानविषयो न भवति । उच्चारणकाल एव शब्दः सर्वसाधारणस्य गोचरीभूतो भवति ।

स्फोटविचारे लघुमञ्जुषायां परा-पश्यन्ती-मध्यमा वैश्वरीति भेदचतुष्टयस्य व्याख्यानं कृतं नागेशभट्टेन । तद्यथा मूलाधारस्थानवर्संस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या विन्दुरूपिणी परा वागुच्यते । नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते । एतद्द्वयं वाग्ब्रह्मयोगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते । ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकस्फोटरूपा श्रोत्रग्रहणयोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिग्राह्या मध्यमा वागुच्यते । तत आस्यपर्यन्तमागच्छता तेन वायुना ऊर्ध्वमाक्रामता च मूर्द्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते । मनुष्या इमामेव वाचं वदन्ति । तदाह-

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा । इति

वैखर्यां हि कृतो नादः परश्रवणगोचरः ।

मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ॥ (परमलघुमञ्जुषा स्फोटविचारः)

शरीरान्तराले समुद्भूतैर्कम्पनैः सर्वासु दिक्षु विसरणं प्राप्यमाणा जगति विस्तारं लभते इति वैखर्या वैखरीत्वम् । अन्या तिस्रः वाचः आभ्यन्तरे जगति समव्यक्ताः । ते

सूक्ष्मसूक्ष्मतरसूक्ष्मतमरूपेणावस्थिता: क्रमशो मध्यमापरापश्यन्तीति समभिख्यया व्यवह्रियन्ते । वाच: ईदृशि विभाजने नाम्न: सार्थकत्वं विज्ञानपरत्वञ्चास्ति ।

पश्यन्ती, मध्यमा, वैखरीति एता: तिस्र: क्रमात् ज्ञानमनुभूति: क्रिया चेति नाम्ना प्रसिद्धिं लभन्ते । पश्यन्तीवाचि आत्मदृष्टिद्वारेण ज्ञानं साधितं, मध्यमायामवस्थायां दृष्टं ज्ञानं मनसि अनुभूयते । वैखरीदशायां उदानेन वायुना स्वरतन्त्रीषु प्रेरितं भूत्वा तदेव ज्ञानं स्वरव्यञ्जनरूपवर्णै: स्फुटीभवन्ति । एषा वैखरी वागेव सर्वै: श्रवणेन तथा लिपिसंकेतेन परिज्ञायते । वाग्योगविद् साधक: वैखर्य्या वाचा अन्तर्मुखीभूय मध्यमां वाचमनुगच्छन्ति । तत: मध्यमया वाचा अन्तर्दृष्ट्या पश्यन्तीवाचमवतिष्ठते, केवलमन्तर्दृष्टिसम्पन्ना: महर्षय: समाधावेतां स्थितिमनुगच्छन्ति । एषा अव्यक्ता वाक् नित्या भवति परावाक्रूपेण व्यपदिश्यते । परावाच: स्थिति ब्रह्मण्येव भवति । परमात्मतत्वे परमे व्योमनि सा व्याप्तवती नैवोपक्षीयते । आकाशवत् व्याप्ता परंब्रह्मण: प्रतीकभूतेयं वाक् । भर्तृहरिप्रमुखा: वैयाकरणा शब्दं ब्रह्मेति स्वीकुर्वन्ति । शब्दराशे: ब्रह्मरूपत्वविषये पतञ्जलेरूक्तिरपि अवधार्य्या यत् - ''सोयमक्षरसमाम्नायो वाक्समाम्नाय: पुष्पित: फलित चन्द्रतारकावत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशि:'' (महाभाष्यम् २/२/२) । वाचश्चत्वारि रूपाणि वेदेऽन्यत्रापि प्रतिपादितानि । तद्यथा-

च॒त्वारि॒ शृङ्गा॒ त्रयो॑ऽस्य॒ पादा॒ द्वे शी॒र्षे स॒प्त हस्ता॑सो अस्य ।<br>
त्रिधा॑ ब॒द्धो वृ॑ष॒भो रो॑रवीति म॒हो दे॒वो मर्त्याँ॒ आ वि॑वेश ॥ (ऋ. वे. ४.५८.३)

मन्त्रेऽस्मिन् ''शाब्दिका: शब्दब्रह्मपरतया चत्वारि शृङ्गेति चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च इत्यादिना व्याचष्टे'' (सायणभाष्ये) । अथापि चत्वारि पदानि वाचश्चत्वारि पदानि ओंकार:, भुर्भुव:स्व:इति तिस्र: महाव्याहृतय: इति वैदिकानां मतम् । वैयाकरणानां मतेन चत्वारि शृङ्गाणि नामाख्यातोपसर्गनिपाता एव । याज्ञिकानां मतेन एतानि चत्वारि मन्त्र:, कल्प:, ब्राह्मणम्, चतुर्थो व्यवहारिकी भाषा एव भवति । नैरूक्तानां मतेन सर्पाणां वाक् । पक्षीणां वाक् क्षुद्रसरीसृपाणां वाक् तथा चतुर्थी व्यावहारिकी वागित्यत्रावधेयम् । इमामेव व्यावहारिकीं वाचं मनुष्या: व्यवहरन्ते । आत्मविद: पशुषु तृणेषु मृगेषु आत्मनि च वाचश्चत्वार्यवस्थानानि दर्शयन्ति । एवं रूपेण त्रिषु लोकेषु वाच: क्षेत्रं विस्तृतम् । परावागोङ्काररूपिणी, पश्यन्ती स्वर्भूता, मध्यमा भुव:रूपा, वैखरी भूरूपिणी भवति । सर्वासां वाचामोङ्कार एव मूलं भवति । अत एवोक्तम्-

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि ओमित्येतद् ॥

(कठोपनिषद्प्रथमाध्याये प्रथमावल्ली श्लोक २५)

वाचः व्यक्ताव्यक्तस्वरूपविषये ऋग्वेदे सूक्ष्मातिसूक्ष्मं वर्णनं वर्त्तते । अस्यवामीयसूक्ते वाचः सामग्रीकरूपस्य दर्शनं पूर्णतया प्रतिफलितम् । तद्यथाः

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुंष्पदी ।

अष्टापदी नवंपदी वभूवुषी सहस्रांक्षरा परमे व्योमन् ॥ (ऋ.वे. १.१६४.४१)

गौरी अर्थात् गरणशीला शब्दब्रह्मात्मिका वाक् शब्दायति, प्रतिष्ठितानि घटपटादिद्रव्याणि तक्षती तत्तत्वाचकत्वेन निष्पादयन्ती एकपदी अव्याकृतत्वेन एकप्रतिष्ठाना एकरूपा वा आत्मना । सा द्विपदी सुप्तिङ्भेदेन पादद्वयवती तथा चतुष्पदी नामाख्यातोपसर्गनिपात भेदेन । सा वाक् पुनरपि आमन्त्रितसहितसप्तविभक्तिभेदेन अष्टापदी भवति । सप्तविभक्तयः सामन्त्रितपदेन साव्ययेन सह नवसंख्यका इति वाक् नवपदी भवति । अथवा सनाभिकेषु उरः कण्ठादिषु नवसु पदेषु समाहता भवन्ति पश्चाद्बहुविधाभिव्यक्तिमुपेयुषी परमे व्योमन् अर्थात् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षरा रूपेणानेकाकारेण व्याप्ता अनेकध्वनिप्रकारा भवति । वाचः नवपदी स्थितिः नाभिः-कण्ठ-तालु-मूर्धा-दन्तोष्ठ-नासिका-जिह्वामूलमुपध्मा-इत्युच्चारण स्थानानि भवन्ति । अथवा त्रीणि वचनानि, त्रीणि लिङ्गानि तथा त्रयः कालाः इति वाचः नवधा स्वरूपं निर्दिश्यते ।

तैत्तिरीयषष्ठकाण्डे वाचः द्विविधं रूपं निर्दिश्यते तद्यथा व्याकृताव्याकृता च "वाग् वै पराच्यव्याकृता अवदात् ते देवा इन्द्रमब्रुवन् । इमां नो वाचं व्याकुरू इति सोऽब्रवीत्, वरं वृणै मह्यं चैवेष वायवे च सह गृह्यतामिति । तस्मादैन्द्रवायव सह गृह्यते, तामिन्द्रो मध्यतोऽवक्रस्य व्याकरोत् । तस्मादियं व्याकृता वागुच्यते ।"

व्याकृतावाचः अपरं द्वयं स्वरूपं वेदेषूपलभ्यते । तद्यथाः घोरा शान्ता च । एका दाहिका अपरा शीतलतायाः प्रदायिका । एका रसशून्या अपरा सरसा । एका संकीर्णा महती चापरा । अत अथर्ववेदे प्राप्यते-

इयं या परमेष्ठिनी वाग्देवी ब्रह्मसंशिता,

यथैव संसृजे घोरं तथैव शान्तिरस्तु नः ॥ (अ.वे. १९.९.३)

ऋग्वेदस्य मन्त्रानुसारेण वाचः रहस्यं भाषानिगडेनानुवन्धितः भूत्वा भाषायाः कारागृहेऽवरूद्धाः सन्तः मानवाः ज्ञातुमनुमातुं सर्वथासमर्था । यतो हि भाषाविषये यावन्ति वक्तव्यानि तानि भाषामयानि भाषारूपाण्येव सन्ति । भाषामाध्यमेन वाचः परमतत्त्वविज्ञानं वृथैव भवति । यत वाक् ब्रह्मरूपिण्याऽस्ति या अनुभवसाध्या भवति । वाक् भाषायाः प्रमूर्त्तवाह्यरूपादारभ्याभ्यन्तरामूर्त्तरूपपर्य्यन्तं सामग्रीकरूपमेव व्यनक्ति । अतएव ऋग्वेदेनोक्तम्-

ऋचो अक्षरे परमे व्योमन्यस्मिन् देवा अधि विश्वे निषेदुः ।

यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ (ऋ.वे. १.१६४.३९)

यः मनुष्यः कृत्स्नवेदतात्पर्यप्रतिपाद्यं यद्तत्त्वं तन्न जानाति स ऋगादिशब्दजालेन किं करिष्यति ? वेदसाधनेन शब्दजालेन वेद्यमेव साध्यं भवति । प्रायोगिकक्षेत्रे भाषाशिक्षणार्थमथवानुवादनिमित्तं कतिपयाः नियमाः तत्त्वानि च विचार्य्यन्ते परं ते नियमाः भाषायाः दर्शनविषये यथार्थतत्त्वविषये कार्त्स्येन व्याख्यातुं सर्वथासमर्थाः । यथार्थेनोक्तं महर्षिदैवरातेन स्वकीयप्रणीतवाक्सुधायाम्-

विश्वे देवाश्च यस्मिन् सममतिमिलिता स्तेऽक्षरे सन्निषेदुः

विश्वान्तर्यामिसत्त्वं प्रथमपदमयं व्योमभूमाक्षराख्यम् ॥

यो वै तन्नैव विद्यात् प्रतिवचनमृचा किं करिष्यत्यभिज्ञः,

सत्यं ब्रह्माक्षरं तत् परममनुविदन्नन्वियात् सोऽमृतत्वम् ॥[२]

भर्तृहरिणापि एतदभिहितं यत् भाषायाः मूलतत्त्वान्वेषणेऽन्तिमं पर्य्यवसानं ब्रह्मण्येव भवति, शब्दतत्त्वमक्षरमनादि निधनं ब्रह्मैव भवति, यतः जगतः प्रक्रिया प्रवर्तते, तत् शब्दतत्त्वमर्थभावेन गोघटाद्यर्थस्वरूपेण विवर्तते, यदा भाषायाः सर्वसोपानानि अतिक्रम्यते तदा मानवः परब्रह्मणा सह तादात्म्यं लभते, तदा जगतः दिक्कालरूपत्वं तथात्मनः पृथगवधारणं विलुप्तं भवति । पुनरपि यदा मनुष्यः भाषाशून्यावस्थातः भाषाजगत्प्रति समायाति तदैतत् सर्वं पुनराभासते । भाषाशून्यावस्थायां केवलं सत्-चिदानन्दात्मिका स्थितिर्वर्तते । भाषाशृङ्खलातः मुक्तिरेव त्रिविधदुःखानामात्यन्तिकनिरसनम् । अतः भाषाजगतः निर्भाषा जगत् प्रयियात्रा एव वाग्विज्ञानस्यान्तः सन्देशः । एतत् तु सत्यं यत् शब्दस्य व्याप्तिमत्त्वात् लघीयसा प्रयासेनैव लोके शब्देन संज्ञाकरणं विधीयते । अतः यास्काचार्येणोक्तम् ''अणीयत्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके'' परं किमेतदेव भाषायाः भाषातत्त्वस्य वा सामग्रीकं रूपं वोधयितुं पर्य्याप्तं भवति ? मनुष्यस्य बुद्धौ परिनिष्ठितस्याः वाचः एकशतांशोऽपि अनेन व्याख्यातः न

२. महर्षि दैवरात, वाक्सुधा, पृष्ठा २९

Vijnana Bharati

स्यात्, मानवस्य वाक् हृदयाभ्यन्तरे चिन्तनरूपेणानुस्फुरितं भवति, अतः केवलं लिखितरूपस्याथवा कथितवाङ्मयस्य ज्ञानेन भाषाया तत्त्वव्याख्यानं पर्य्याप्तं न स्यात्, यथोदके भासमानस्प तुषारखण्डस्य वहिर्दृश्यमानः भागः तुषारखण्डस्य पूर्णं स्वरूपं न भवति तथैव वाचः व्यावहारिकरूपस्याध्ययनं वाचः रहस्यं पूर्णतया वोधयितुं सर्वथासमर्थम् । वाचः यत् परमं श्रेष्ठतत्वमस्ति तदनधिगम्यमदृश्यञ्च सर्वैर्भवति । अत एवोक्तमृग्वेदे-

यद्वाग्वदंन्त्यविचेतनानि राष्ट्रीं देवानां निषसादं मन्द्रा ।
चतंस्र ऊर्जं दुदुहे पयांसि क्वं स्विदस्याः परमं जंगाम ॥ (ऋ. वे. ८, १००.१०)

## ६. उपसंहारः

एवमेव वाचः चमत्कारीतायाः विविधसूक्ष्मानुसूक्ष्मपर्य्यालोचनमुपलभ्यते वैदिक वाङ्मये, यस्यानुशीलनं भारतीयप्रज्ञायाः वाग्विज्ञानस्योत्कर्षं प्रतिपादयति, भाषाशास्त्रक्षेत्रे भारतीयचिन्तनस्य प्रौढ़ताञ्च प्रतिपादयति । वाचः कलात्मिकामूर्त्तिः एतादृशी भवति या सृष्टेः नव-नव निर्माणस्य सनातनं रहस्यं सहृदयस्य कृते वाग्योगविदे परिप्रकाशयति न तु सर्वेषां कृते । अत एवोक्तमृग्वेदे :

उत त्वः पश्यन्न दंदर्श वाचंमुत त्वंः श्रृण्वन्न श्रृंणोत्येनाम् ।
उतो त्वंस्मै तन्वं१ वि संस्रे जायेव पत्यं उशती सुवासाः ॥ (ऋ. वे. १०.७१.४)

वाचं प्रति यस्य निष्ठा वर्तते, स्वाध्यायं प्रति यः स्वभावत अनुरागी भवति स वाचः सुहृद्भूतः मित्रभूतः भवति । श्रद्धां विना तपो विना वाचः महत्वं नोपलभ्यते । अत ऋचाभ्यूक्तम्-

यस्तित्याजं सचिविदं सखांयं न तस्यं वाच्यपिं भागो अंस्ति ।
यदीं श्रृणोत्यलंकं श्रृणोति नहि प्रवेदं सुकृतस्य पन्थाम् ॥ (ऋ. वे. १०.७१.६)

वाचः अर्थज्ञाने एव वाचः यथार्थानुग्रहः लभ्यते । वेदार्थज्ञः प्रशस्तः भवति अविज्ञातार्थ पुरुषः केवलपाठकः वेदे निन्द्यते । तद्यथा-

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अंफलामंपुष्पाम् ॥ (ऋ. वे. १०.७१.५)

अतः वेदे वाचः व्यक्ताव्यक्तरूपयो उत्कर्षं महत्त्वं तामधिगन्तुं मार्गश्चोत्तमरूपेण संन्दिष्टम् । एतेषां तत्त्वानां यथार्थानुशीलनेन मनुष्यः वाग्योगविद्भूत्वा सकलमैहिकमामुष्मिक-फलञ्च लब्ध्वा मोक्षं लभेत । अत एवोक्तमृग्वेदे :-



Vijnana Bharati

सहस्रधा पंञ्चदशान्युक्तथा यावद् द्यावापृथिवी तावदित् तत् ।
सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक् ॥
(ऋ. वे. १०.११४.८)

## सहायक ग्रन्थसूची


१. अथर्ववेदसंहिता, नागप्रकाशकः, दिल्ली, १८८४

२. ऋग्वेदसंहिता, श्रीमत्सायणाचार्थ विरचित भोष्यसमेता वैदिक संशोधन मण्डलेन प्रकाशिता, पुना, १९८४

३. ''द वैदिक् जेनेसिस् अफ् स्पिच्'', (शोधप्रवन्धः) । प्रखेसर् अलेख चन्द्र षड़ङ्गी लोकप्रज्ञा (सप्तमसंख्या) (मानसहंस पण्डित वाञ्छानिधि दाश अभिनन्दन ग्रन्थः) । सरस्वती, भद्रक, १९९९

४. परमलघुमञ्जुषा (नागेशभट्टविरचिता), सम्पादक : पाण्डित अलकावेद शर्मा, चौखम्बा संस्कृत कार्य्यालयः, वाराणासी, १९७४

५. वाक्यपदीयम् (भर्तृहरि विरचितम्), ब्रह्मकाण्डम्, सम्पादकः - आचार्य सत्यनारायण शास्त्री खण्डुरी, कृष्णदास अकादेमी, वाराणसी, १९९७

६. वाग्विज्ञानम् (शोधप्रबन्धः), राजनाथ पाण्डेयः, आम्भृणीयम् (आचार्य रमेश चन्द्र शुक्लाभिनन्दनग्रन्थः), सम्पादकः सत्यप्रकाश शर्मा, प्रथमसंस्करणम्, उत्तरप्रदेशः, १९८३

७. वैदिक एवं वदोत्तर भारतीय संस्कृतिः, लेखक-पाण्डित श्री गङ्गाधर मिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९८२

८. वैदिकी, डाः मुशीराम शर्मा, प्रकाशक ग्रन्थम् रामवाग,. कानपुर, प्रथमसंस्करणम्, १९७२

९. महर्षि दैवरात, वाक्सुधा, मदनगोपाल पोहार चैरिटी ट्रष्ट, कलकत्ता-१६, १९७१


Vijnana Bharati